Lingashtakam

लिङ्गाष्टकम्

NityaPaath
nityapaath.com/lingashtakam/

SHLOKA · श्लोक

1 ब्रह्ममुरारिसुरार्चितलिङ्गं
निर्मलभासितशोभितलिङ्गम्।
जन्मजदुःखविनाशकलिङ्गं तत्प्रणमामि
सदाशिवलिङ्गम्॥

2 देवमुनिप्रवरार्चितलिङ्गं कामदहं
करुणाकरलिङ्गम्।
रावणदर्पविनाशनलिङ्गं तत्प्रणमामि
सदाशिवलिङ्गम्॥

3 सर्वसुगन्धिसुलेपितलिङ्गं
बुद्धिविवर्धनकारणलिङ्गम्।
सिद्धसुरासुरवन्दितलिङ्गं तत्प्रणमामि
सदाशिवलिङ्गम्॥

4 कनकमहामणिभूषितलिङ्गं
फणिपतिवेष्टितशोभितलिङ्गम्।
दक्षसुयज्ञविनाशनलिङ्गं तत्प्रणमामि
सदाशिवलिङ्गम्॥

5 कुङ्कुमचन्दनलेपितलिङ्गं
पङ्कजहारसुशोभितलिङ्गम्।
सञ्चितपापविनाशनलिङ्गं तत्प्रणमामि
सदाशिवलिङ्गम्॥

6 देवगणार्चितसेवितलिङ्गं भावैर्भक्तिभिरेव च
लिङ्गम्।
दिनकरकोटिप्रभाकरलिङ्गं तत्प्रणमामि
सदाशिवलिङ्गम्॥

7 अष्टदलोपरि वेष्टितलिङ्गं
सर्वसमुद्भवकारणलिङ्गम्।
अष्टदरिद्रविनाशितलिङ्गं तत्प्रणमामि
सदाशिवलिङ्गम्॥

8 सुरगुरुसुरवरपूजितलिङ्गं
सुरवनपुष्पसदार्चितलिङ्गम्।
परात्परं परमात्मकलिङ्गं तत्प्रणमामि
सदाशिवलिङ्गम्॥

PHALASHRUTI · फलश्रुति

9 लिङ्गाष्टकमिदं पुण्यं यः पठेच्छिवसन्निधौ।
शिवलोकमवाप्नोति शिवेन सह मोदते॥

Text checked against: Gita Press, Gorakhpur: Shiv Stotra Ratnakar, Sanskrit text with Hindi translation. Meanings, audio and all scripts at nityapaath.com/lingashtakam/